## ।। अथ चतुर्थोऽध्याय: ।। Chapter-4

राजा उवाच :- कथं चकार भगवान्तपांसि तपसां निधि: ।
१(२)
भूय: पवित्रतामस्य क्षेत्रस्य द्विजसत्तम ।। १

बी २
वसिष्ठ उवाच:- श्रृणु राजन् पुराकृतमिदमाख्यानमद्भुतम् ।
श्रुत्वा यन्मानवो लोके न पापे वर्त्तते क्वचित् ।। २

बी ३
आवृतं वारूणैर्वृक्षै नानाविहंगनादितम् ।
३(१)
शालैस्तालैस्तमालैश्च पुन्नागैर्नारिकेरकैं : ।।३

ए(१) बी४
खर्जूरै: पनसैराम्रै बकुलै: कोविदारकै: ।
बी ५
जंबुराजीवनाश्वत्थक कपित्थ-वट-पादपै: ।। ४

५(१)
अन्यैरपि समाकीर्णि तरूभि: प्राप्य गौतम: ।
५(२)
कुंडानि शास्त्रत: कृत्वा मंत्रैरग्निं न्यवेशयत् ।। ५

बी ६
उत्तंक प्रमुखा: शिष्यास्त्वरयामास तत्र च ।
६(२)
बर्हिषां समिधां चैव करीषाणां च सर्वत: ।।
बी ७
निचयानुत्सुकाश्चक्रु रावापान्खालशाखिनाम् ।।६

७(२) बी ८
शाखा: शाखाभिराबध्य क्लवृक्षा दलावृताम् ।
पर्णशालां च ससृजु विशालां सर्वत: समाम् ।। ७

तीर्थोदकैरभिप्रोक्ष्य गोमयेनानुलिप्य च ।
ए (२)
वास्तुपूजां मुनिश्चक्रे नानापुष्पै: सुगंधिभि: ।
श्रपितैरपि नीवारैं बलिं दत्वा विधानत: ।। ८

------------

१- ई बी - धि , २- ई बी त, ३- बी वरूणो, ३ ई(१) श्रु, ४- ई बी ४ र,
५- ई बी - जंबुराजादनाश्चकपित्थ्यंवटपाले:, ५- ई(१) गौतम , ५-(२) ई कृत्वा,
५-(३) ई- मंत्रै श्रृपे त्पनि वशयेसु, ६- ई बी- सिख्या:त्वर, ७-ई बी- विचयानु,
८- ई बी- दलायितं, बी-९- श्री पतैरपिनी, ६-(२) ई बर्हि, ७-(२)ई- साषाशाखामि ।

------

(१) २ ए प्रवित्र ए (१) खर्जुरै ए (२) पु

------

बी १
प्राचीनाग्रेषु दर्भेषु मुनिर्मौनाय सत्वरम् ।
१(२)
आदिदेश गुरूः शिष्यान् यत्नोऽत्र, क्रियतामिति ।। ६

ए (१) १(३)
ततो, दिशु विचिन्वप मंत्रैरश्वत्थकीलकान् ।
स्वयंभुवे नमस्कृत्य शंभवे विष्णवे तथा ।। १०

ए(२)
दुष्करं तप आतिष्ठन्गौतमः स महानृषि : ।
बी(३)
सन्निरुध्यैन्द्रियग्राम मूर्ध्वबाहुर्महातपा: ।। ११

ए (२)
पिबन्सूर्य प्रभां नेत्रे स्तस्थौ गिरिरिवाचल: ।
बी(४)
निर्दंशमशके देशे तथैवातिमन: प्रिये ।। १२

बी ५
अगच्छन्द्रशवर्षाणि गौतमस्य तपस्यत: ।
बी(६)
तथापि न च तं देवा वास्यामासुरीप्सितं: ।। १३

बी (७) (३)
तत: प्राणानुपायम्य महीमंगुष्ठकोटिना ।
स्पृशन्नूर्ध्वमुखो धीमानवात्सीद्विंशतिसमा: ।। १४

बी ८
तथापि न प्रसादाय कुरुते विश्वभुग्मतिम् ।
तत: कापालिकं कृत्वा मुनिरासनमुल्वणम् ।। १५

चक्षुर्भ्यां भास्करं पश्यन्प्राणाभ्यामपरायण : ।
ए(५)
तस्थौ गिरिरिवादाभ्य: स्थाणुभूतस्तपोनिधि: ।।१६

--------

ई बी - नु, १-(२) ई- आदिदेवेश गुरुशिष्या, १-(३)ई मंत्रैरश्चक्ककालकान्
२- ई बी - दुश्वरंतप, ई बी (३) निरूध्येंद्रियग्रामं ४- ई बी योवातिमनप्रिये
५- ई बी - आ, ६- ई बी सुरासितै:, ७ ई बी- पानस्पम, ८- ई बी ति

-----

१) - ए नि
२- ए गिरिवाचल:
३- ए- ष्ट
४- ए ति
५- ए- गिरिवादाभ्फ:

-----

ए(१) बी(१) ए(२) बी(२)
स्तम्भश्वासानिलक्षोभाद्दुभुक्ते जठरानले ।
धूमौ विनिर्ययौ राजन् श्रोत्राभ्यां गौतमस्यच ॥
ततो नभस्तलं प्राप्ता चकाशे धूमपद्धति: ॥ १७

ए (३)
मीनाहता सरस्तीरे यथा शैवालवल्लरी ।
न किंचिद्दृश्यते तत्र धूमधामलितं नृप ॥ १८

बी(३)
संभ्रमभ्रांतहृदयै रुद्दुड्डीयत नीडजै: ।
३(१)
व्यक्तं न लक्ष्यते राजन्व पुत्रस्य महात्मन: ॥ १९

बी ४
बहुलीभूतधूमत्वाद्वनेऽस्मिन्त पोमये ।
हाहाकारो महानासीत् तद्विलोक्य मुनेस्तप: ॥ २०

बी ५
त्र्यंबकसर:स्थानां मुनीनां दीर्घदर्शिनाम् ।
प्रवृत्ता: खेचराणां वै श्रूयंते मधुरा गिर: ॥ २१

अयं मुनिवरो नाम नाम्नाख्यातोऽत्र गौतम: ।
७ ६
तप: करोति सुमहन्न विघ्नः केन हेतुना ॥ २२

अकाले प्रलयो नूनं भविष्यति शरीरिणाम् ।
यदीप्सितेन देवेशो नैनं संयोजयिष्यति ॥ २३

-----

१- ई बी सानल क्षोभात् । २- ई बी तेजजठरानले, ३- ई बी सम्भ्रमस्तांत, ३(१)-ई- लक्षिता, ४- ई बी धूमभूत - भूतधूम, ५- ई बी न:, ६- ई बी रा:, ७- ई बी- करोसु

-------

(१) ए- शा
(२) ए- दुभुदुतो जठरानले
(३) ए- सै

-----

ए (१)
अथ ब्रह्मादयो देवा: पुरोधाय महेश्वरम् ।
बी१
तपोवनान्नातिदूरे व्योमक्रान्त्वावतस्थिरे ।। २४

बी २
ततोऽम्भोज ~~तत्कर्मा~~ भवनाशौ विष्णुना वासवेन च ।
२(१)
प्राह प्रणादितो वाक्यमिदं, चन्द्रार्धशेखर: ।। २५

(३)
देवदेव उवाच :- वरंवरयविप्रर्षे यत्तेमनसि वर्त्तते ।
अस्माच्च तपसो घोरात्द्विप्रं विप्र गौतम् ।। २६

एते शक्रादयो देवा ब्रह्मणा सह केशव : ।
अहं हि तपसानेन परितोषमुपागत: ।
२(२)
इदंयंतिवरेणात्वां तद्ब्रूहि मुनिसत्तम ।। २७

गौतम उवाच:- यदि तुष्टा महेशान मम देवा भवन्मुखा : ।
क्तोधन्यतरो नास्ति मर्त्यो लोकेषु कश्चन: ।। २८

३(१)
वृणोमि वरमेनं तु प्रीता: शृण्वंतु देवता: ।
४ (४)
आश्रमोऽयं ममैवास्तु नाम्नाख्यातोजगत्त्रये ।। २९

५ (५)
तच्छायं च शिखिरं सरश्व सुरसंमतम् ।
ब्रह्मा ब्रह्मविष्णुमहेशानां स्थितिरत्रास्तु शाश्वती ।
बी (६)
श्रद्धयासमुपेतानां नृणामस्तु महत् फलम् ।। ३०

------

१-बी- नंनाति, २- ई बी भवेता सौ, ३- ई बी क्तोधुनातरोनास्ति मुर्त्यं लोके षुकश्चन
४- बी - आसमो ५- ई बी- वरूण, ६- ई बी श्रद्धयासमुपेतानांतृणमस्तुमहत्फलं
२-(१) ई - पाहप्रणिदितो २-(२) ई- म:, ३- (१) ई- ता

-----

(१) ए में (२) ए ता[
(३) ए ते (४) ए त्रये
(५) ए संतम् ।

-------

श्री भगवानुवाच:- अद्यप्रभृति विप्रर्षे गौतमाश्रमसंज्ञकम् ।
विख्यातमिदमित्युच्चै स्तीर्थं लोके भविष्यति ।। ३१

माघमास्यसिते पक्षे चतुर्दश्यां हि ये नरा: ।
अत्र स्नानं करिष्यंति श्राद्धं दानं शक्तित: ।
प्राप्स्यंति ते न संदेहो मया सह विलोकताम् ।। ३२

विष्णुरुवाच :- एकादशीदिने प्राप्ते ये नरा भक्तितत्परा: ।
स्नास्यंति निविशिष्यंति ते प्राप्स्यंत्युत्तमां गतिम् ।। ३३

ब्रह्मोवाच :- प्रतिपद्वासरे शुक्ले ब्राह्मणो य: समाहित: ।
श्रद्धयाप्लुत्य पीत्वा च ब्रह्मलोकं गमिष्यति ।। ३४

इन्द्रउवाच :- शुक्लायामथकृष्णायां सप्तम्यां येऽत्र गौतम ।
नरा हवींषि होष्यंति समुद्दिश्य सुरोत्तमान् ।। ३५

हयमेधशतैरिष्टं समाप्तः वरदक्षिणाम् ।
भविष्यति मुनिश्रेष्ठ नात्रकार्या विचारणा ।। ३६

आदित्याऊचु:- अत्राश्रमे गौतमस्य सर्वदेवमये शुभे ।। ३७
यावत्कुलानि सप्तैव सप्तजन्मानि च ध्रुवम् ।
पुत्रादिषु रुजस्तेषां न भविष्यंति गौतम: ।। ३८

रुद्राऊचु:- चतुर्दश्यां चतुर्दश्यां रुद्रपूजापरायणा: ।
अग्रलोकानवाप्स्यंति नरा रुद्रसमाश्रिता: ।। ३९

------

१- ई बी - दौ , २- बी - प्रतिपत , ३- ई बी- गौतम:, ४- बी नरो हवींष्यि,
४- ई(१)- नित्यं सूर्योदयेस्नानंये करिष्यतिदेहिन: । अधिक है ।
५- ई बी - अत्र ।

---------

१-ए- विं २- ए- स्ती ३- ए- तपत्परा: ४-ए- विं
५-ए- स ६- ए- णा: ७- ए- म:

-------

वसवऊचु: — अष्टम्यां ये मुनिश्रेष्ठ गौतमीये सरोजले ।
बी-१
आप: स्पृशंति मर्त्या वै न तेषां दुष्कृतात्क्षयम् ।। ४०

ए(१)(२)बी ए(२)
अग्निऊचु: — यो द्विजाति: कृतस्नानो वन्हावत्र हवि: क्षिपेत् ।
तेन स्यादध्वरै: श्रेष्ठैरिष्टं खलु शतं समा: ।। ४१

सप्तर्षयऊचु: — ये वै नभस्यपंचम्यां शुक्लायां द्विजसत्तम ।
बी (३)
ऋषीन्संतर्पयिष्यंति ते यास्यंत्यब्जजालयम् ।। ४२

बी ४
पितर ऊचु: — पितरस्तर्पयिष्यंति जलैर्ये गौतमाश्रमे ।
५ बी
तेभ्यो हि पितरस्तुष्टा दास्यंत्यक्षयसंपद: ।। ४३

गंधर्वा ऊचु: — गौतमीये सर:श्रेष्ठे स्नात्वा य: सततं सुधी: ।
गंधान्दास्यंति विप्रेभ्यो दुर्भगा मा भवंतु ते ।। ४४

श्री भगवानुवाच: - पंचगव्यूतिमात्रोऽयं मुनिश्रेष्ठ तवाश्रम : ।
बी६
गयाशीर्षसमो लोके भविष्यति न संशय: ।। ४५

बी (७)
वसिष्ठ उवाच: - इत्युक्त्वांतर्दधे देव: सह देवै: सवासवै: ।
बी (८)
ममतासक्तचित्तस्य प्रबोध इव देहिन : ।। ४६

गौतमोऽपि महीपाल सह शिष्यैर्महातपा: ।
ए(६)
स्थितिं चकार सहसा विधौतितवनांतर: ।। ४७

------

१- ई बी- अप:, २- ई बी- द्विजाति:कृत, ३- ई बी- कालयं, ४- ई बी- ये, ५- ई बी- संतति ६- ई बी - भूविष्यंतिनसंशया ७- ई बी- सहदेवोसदाशिव । ८- ई बी - मननाशक्र ।

----

ए- श्रेष्टे

(१)-ए- ति — (२)ए- कृत: स्नानो

(३) ए- श्रेष्टेरिष्टं — (४) ए- मयां

(५) ए- सरश्रेष्टे — (६) ए- दार :

------

सूत उवाच :- कालेन गच्छता तस्य महर्षेर्भावितात्मनः ।
शापांते संगता प्रीता अहिल्या धर्मचारिणी ।। ४८

ए(१)
तया सह मुनिश्रेष्ठस्तत्रास्ते लोकवंदितः ।
८१ ए (२)
एवमासीन्महीपृष्ठे विख्यातो गौतमाश्रमः ।। ४९

दर्शनादेव मर्त्यानां नाशयत्यशुभं ध्रुवम् ।
अत्र गाथा पुरा गीता देवलेन महात्मना ।
तीर्थयात्रागतेनैव तां नरेन्द्र निशामय ।। ५०

एकतस्त्र्यंबकं सुरस्थं ली गौतमाश्रमः ।
बी१ बी२
अत्रांतरे तनुत्यागान्न भूयो जायते नर : ।। ५१

ए(३)
इदं पवित्रमाख्यानं यः शृणोति समाहित : ।
तस्य नश्यंति पापानि नैक जन्मकृतान्यपि ।। ५२

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां ब्राह्म्यवि भागे तृतीय परिच्छेदे श्रीमालमहात्म्ये गौतमाश्रमवर्णनं नाम चतुर्थोऽध्याय : ।।४।।

----

१- ई बी- हा , २- ई बी त्रं , २ ई बी अत्रंतरे तनुत्यागीन्न

----

१- ए- श्रेष्टा
२- ए- पृष्टे
३- ए- शृणोती ।

-----